महावि० का नाम
अ० कि० सं० महावि० रहीमपुर, खगड़िया
दिनाङ्क - 29.04.2021
उपशास्त्री द्वितीय वर्ष
व्याकरण
भाग - 59

विषय - तत्पुरुष समास प्रकरणम्

'भोज्य ओदन इति'। अत्र ओदनशब्दस्य जातिवाचित्वेनायं समासो न भवतीत्यर्थः। नन्वेतत्समासाभावेऽपि विशेषण समासो दुर्वार इत्यत आह- प्रतिषेधेति। भोज्यशब्द पूर्वनिपातस्योभयत्रापि विशिष्टतया 'अजात्या' इति पर्युदासेनैव चर्चादिति भावः। वर्णो। शेष पूरणेन सूत्रं व्याचष्टे- समानाधिकरणेनेति। वर्णवाचिना समानाधिकरणेन वर्णवाची समस्यते, स तत्पुरुष इत्यर्थः 'कृष्णसारङ्ग' इति। सारङ्गश्चित्रवर्णवान्। कृष्णशब्दः कृष्णावयवके लाक्षणिक इति सामानाधिकरण्यम्। कृष्णश्चासौ सारङ्गश्चेति विग्रहः। विशेषणसमासेन सिद्धे इदं प्रपञ्चार्थमेव। ननु 'वर्णो वर्णेष्वनेते' इति स्वर विधौ प्रतिपदोक्तत्वादस्यैव ग्रहणार्थमिदम्। तेन सारङ्गस्यावयवः कृष्णाः सारङ्गः कृष्ण इत्यत्र वर्णो वर्णेषु इति स्वरो नेति, तच्चिन्त्यम्, कर्मधारय स्वर प्रकरणे 'वर्णो वर्णेष्वनेते' इति सूत्रस्य पाठेनैव सिद्धेरिति दिक्। 'कडाराः कर्मधारये'। 'उपसर्जनं पूर्वम्' इत्यतः पूर्वमित्यनुवर्तते। कडार इति बहुवचननिर्देशात् गडुलादि ग्रहणम्, तदाह 'कडारादय इति' 'उपसर्जनं पूर्वम्' इति नित्ये प्राप्ते विकल्पोऽयम्। कडार जैमिनिरिति कडारश्चासौ जैमिनिश्चेति विग्रहः।



कुमारः श्रमणादिभिः। कुमारशब्दः श्रमणादिभिः समानाधिकरणैः समस्यते, स तत्पुरुष इत्यर्थः। 'कुमारी श्रमणा' कुमारश्रमणेति। 'पुंवत्कर्मधारय' इति पुंवत्त्वम्। श्रमणा परिव्राजिका। ननु सूत्रे कुमार शब्दस्य पुंलिङ्गस्यैव पाठात् कथमिह स्त्रीलिङ्गस्योदाहरणमित्यत आह- 'इति। ननु गणे स्त्रीलिङ्गानामेव पाठे सूत्रस्य कथं तेषु प्रवृत्तिः। न च लिङ्गविशिष्ट परिभाषेति वाच्यम्, तत्सद्भावे प्रमाणाभावादित्यत आह- 'लिङ्गेति'। 'गतदेवेति'। एतद्पीत्यर्थः, 'युवा खलति' इति सूत्रे जरती ग्रहणस्यापि तज्ज्ञापकत्वात्। न हि युवन्शब्दस्य जरती सामानाधिकरण्यमस्ति। चतुष्पादो गर्भिण्या। 'जाति ग्रहणं कर्तव्यम्' इति वार्तिकमभिप्रेत्याह- 'चतुष्पाद्जातीति। गोगर्भिणीति। गर्भिणी चासौ गौश्चेति विग्रहः। विशेषणस्य पूर्वनिपातार्थमिदं सूत्रम्। जातीरिति किम्? कालाक्षी गर्भिणी। 'मयूरव्यंसक इति। व्यंसकश्चासौ मयूरश्चेति विग्रहः। 'व्यंसको धूर्त इति' अत्र कोशो मृग्यः। गुणवचनत्वाद् व्यंसक शब्दस्य पूर्व निपाते प्राप्ते इदं वचनम्। 'उच्चावचमिति। उदक्शब्दस्य उच्चेत्यादेशः। अवाक्शब्दस्य अवचादेशश्च। उच्चावच नैकभेदम्' इत्यमरः। 'निश्चप्रचमिति'। निश्चित शब्दस्य निश्चादेशः। प्रचित शब्दस्य प्रचादेशः। 'नास्ति किञ्चनेति। चनेत्यव्ययमत्यर्थः। नास्ति किमपि यस्येत्यर्थे बहुव्रीह्यपवादस्त्रिपदस्तत्पुरुषः। नञो नकारस्य लोपश्च निपात्यते।

दिनेश प्रसाद सिंह
एसोसिएट प्रोफेसर
व्याकरण

Scanned with CamScanner